नाट्योत्पत्तिर्यथा,—
"इहानुश्रूयते ब्रह्मा शक्रेणाभ्यर्थितः पुरा।
चकारालम्ब्य वेदेभ्यो नाट्यवेदन्तु पञ्चमम्॥
उपवेदोऽथ वेदाश्च चत्वारः कथिताः स्मृतौ।
तत्रोपवेदो गान्धर्व्वः शिवेनोक्तः स्वयम्भुवे॥
तेनापि भरतायोक्तस्तेन मर्त्ये प्रचारितः।
शिवाजयोनिभरतास्तस्मादस्य प्रयोजकाः॥"
इति सङ्गीतदामोदरः॥

नाट्यधर्म्मिका, स्त्री, (नाट्यधर्म्मोऽस्त्यस्याः क्रियाया इति ठन्।) इयं नार्यंशाख्योक्तनाट्यम्। यथा, हेमचन्द्रः।
"गीतवाद्यनृत्यत्रयं नाट्यं तौर्य्यत्रिकञ्च तत्।
संगीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्म्मिका॥"

नाट्यप्रियः, पुं, (नाट्यं प्रियं यस्य।) शिवः। इति हेमचन्द्रः। २। ११२॥

नाट्यशाला, स्त्री, (नाट्यस्य नृत्यगीतादेः शाला गृहम्।) प्रासादद्वारसमीपगृहम्। नाटमन्दिर इति भाषा। यथा,—
"नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया॥"
इति गरुड़पुराणम्॥

नाट्यालङ्कारः, पुं, (नाट्यस्य अलङ्कारः।) नाट्यभूषणहेतुः। स तु अष्टषष्टिप्रकारः। यथा,—
"सिद्धिर्म्मनोरथोऽभेशो निरुक्तिश्च विशेषणम्।
गुणाभिपात उद्दिष्टविचारप्राप्तिनीतयः॥
अभिप्रायः परीहारो गर्हणानुनयौ तथा।
अर्थापत्तिः प्रसिद्धिश्च दाक्षिण्यं प्रियभाषणम्॥
अभिमानाख्यानगर्व्वा हर्षक्षोभोद्यमाश्रयाः।
पश्चात्तापः स्पृहाक्रन्दौ कपटश्च प्रवर्त्तनम्॥
उत्तेजनश्च दृष्टान्तः क्षोभोदाहरणे अपि।
संशयोऽक्षरसंघातो विमलोक्तिः पदोच्चयः॥
परीवादोऽनुक्तसिद्धिरथमाध्यवसायकौ।
प्रोत्साहनं तुल्यतर्कं उपपत्त्यनुतर्कणे॥
निवेदनञ्च साहाय्यं याच्ञा पृच्छा विशेषणम्।
अभिज्ञानञ्च स्वारूप्यं गुणकीर्त्तनसुक्तयः॥
विपर्य्ययश्चातिशयो भूयाहेतुनिदर्शनम्।
मानालेशश्च संक्षेपसमीक्षाशीर्विसर्पकाः॥
उल्लेख उपदिष्टौ चेत्यष्टषष्टिमिता अमी।
अलङ्कारा मता नित्यं नाटकादिषु सूरिभिः॥"
इति सङ्गीतदामोदरः॥
(साहित्यदर्पणमते त्रयस्त्रिंशत् नाट्यालङ्काराः। यथा, तत्रैव। ६। २००—२१२।
"आशीराक्रन्दकपटाक्षमागर्व्वोद्यमाश्रयाः।
उत्प्रासनं स्पृहाक्षोभपश्चात्तापोपपत्तयः॥
आशंसाध्यवसायौ च विसर्पोल्लेखसञ्ज्ञितौ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम्॥
प्रोत्साहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम्।
उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम्॥
प्रवर्त्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम्।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः॥
आशीरिष्टजनाशंसाक्रन्दः प्रलपितं शुचा।
कपटं मायया यत्र रूपमन्यद्विभाव्यते॥
क्षमा सा परिभवः स्वल्पोऽपि नाभिसह्यते।
गर्व्वोऽवलेपजं वाक्यं कार्य्यस्यारम्भ उद्यमः॥
ग्रहणं गुणवत्कार्य्यहेतोराश्रय उच्यते।
उत्प्रासनन्तूपहासो योऽसाधौ साधुमानिनि॥
आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा।
अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु॥
मोहावधीरितार्थस्य पश्चात्तापः स एव तु।
उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये॥
आशंसनं स्यादाशंसा प्रतिज्ञाध्यवसायकः।
विसर्पो यत्समारब्धं कर्म्मानिष्टफलप्रदम्॥
कार्य्यग्रहणमुल्लेख उत्तेजनमितीष्यते।
स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्॥
भर्त्सना तु परीवादो नीतिः शास्त्रेण वर्त्तनम्॥
उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा।
उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम्॥
प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम्।
साहाय्यं सङ्कटे यत् स्यात् सानुकूल्यं परस्य च॥
अभिमानः स एव स्यात् प्रश्रयादनुवर्त्तनम्।
अनुवृत्तिर्भूतकार्य्याख्यानमुत्कीर्त्तनं मतम्॥
याच्ञा तु क्वापि याच्ञायाः स्वयं दूतमुखेन वा।
परीहार इति प्रोक्तः कृतानुचितमार्ज्जनम्॥
अवधीरितकर्त्तव्यकथनन्तु निवेदनम्।
प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधुप्रवर्त्तनम्॥
आख्यानं पूर्व्ववृत्तोक्तिः युक्तिरर्थावधारणम्।
प्रहर्षः प्रमदाधिक्यं शिक्षा स्यादुपदेशनम्॥"
एतेषामुदाहरणन्तु तत्रैव द्रष्टव्यम्॥)

नाट्योक्तिः, स्त्री, (नाट्ये नृत्यगीतादौ या उक्तिः।) नाटकविषयकवचः। नटानां कर्म्म नाट्यं तत्रोक्तिः नाट्योक्तिः। इति भरतः॥ तद्यथा। आर्य्येति ब्राह्मणम्। क्षत्रियं महाराजेति। सखीं हलेति। नीचं हण्डे इति। चेटीं हञ्जे इति। स्वामिनमार्य्यपुत्रेति। राजश्यालं राष्ट्रियेति। समानं हंहो इति। राजानं देवेति। सार्व्वभौमं भट्टेति। भगिनीपतिमावुत्तेति सम्बोधयेत्। इति सङ्गीतदामोदरः॥ गणिकायां अज्जुका। विदति भावः। जनके आवुकः। कुमारे युवराजभर्त्तृदारकौ। राज्ञि देवभट्टारकौ। राजसुतायां भर्त्तृदारिका। कृताभिषेकायां राज्ञ्यां देवी। इतरासु राज्ञीषु भट्टिनी। अवध्योक्तौ अब्रह्मण्यम्। मातरि अम्बा। बालायां वासुः। आर्य्ये मारिषः। ज्येष्ठाभगिन्यां अत्तिका। निष्ठायां निर्व्वहणम्। इत्यमरः। १।७।११—१५॥ (यथाच साहित्यदर्पणे। ६। १५४—१६०।
"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्।
सर्व्वश्राव्यं प्रकाशं स्यात्तद्भवेदपवारितम्॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते।
त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्॥
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्।
किं ब्रवीषीति यत् नाट्ये विना पात्रं प्रयुज्यते॥
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम्॥
इत्थं सिद्धाश्च सेनाश्च वेश्यानां नाम दर्शयेत्।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत्॥
नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम्
नायिकानायकाख्यानां संज्ञाप्रकरणादिषु॥
नाटिकासट्टकादीनां नायिकाभिर्विशेषणम्।
प्रायेण ण्यन्तकः साधिर्गमैः स्थाने प्रयुज्यते॥
राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः।
राजर्षिभिर्वयस्येति तथा विदूषकेण च॥
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च।
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः॥
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्॥
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः।
सूत्रधारो मारिषेति हण्डे इत्यधमैः समाः॥
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चाग्रजः।
भगवन्निति वक्तव्याः सर्व्वे देवर्षिलिङ्गिनः॥
वदेद्राज्ञीश्च चेटीश्च भवतीति विदूषकः।
आयुष्मन्रथिनं सूतो वृद्ध तातेति चेतरैः॥
वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः॥
विप्रैरयममात्येति सचिवेति च भण्यते।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः॥
अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः
स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः।
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः।
हलेति सदृशी प्रेष्या हञ्जे वेश्याऽज्जुका तथा॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरतीजनैः।
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः॥
शकादयश्च सम्भाष्या भद्रदत्तादिनामभिः।
यस्य यत् कर्म्म शिल्पं वा विद्या वा जातिरेव वा॥
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम्॥")

नाड़िः, स्त्री, (नाड़यतीति। नड़ भ्रंशे + णिच् + इन्।) नाड़ी। इत्यमरटीकायां भरतः॥

नाड़िकं, क्ली, (नाड़िरिव प्रतिकृतिः। नाड़ि + "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) कालशाकम्। इति भावप्रकाशः॥

नाड़िका, स्त्री, (नाड़ी एव। स्वार्थे कन्।) षट्चषः। घड़ि इति भाषा। तत्पर्य्यायः। साधारिका २ घटिका ३। इति हेमचन्द्रः। २।५१॥ घटिकाज्ञानोपायो यथा,—
"निमेषो मानुषो योऽयं मात्रामात्रप्रमाणकः।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कला॥
नाड़िका तु प्रमाणेन कला दश च पञ्च च।
उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश॥
हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः।
मागधेन प्रमाणेन जलप्रस्थस्तु संस्तृतः॥"
इति विष्णुपुराणम्॥